# अर्द्ध वार्षिक परीक्षा 2018-2019

नामांक

कक्षा – दशमी

विषय – संस्कृतम्

समय : 3.15 घण्टे पूर्णांक – 70

ध्यातव्य :–कार्य स्वच्छतया करणीयम्। सर्वे प्रश्नाः निर्देशानुसारेण कुर्युः।

1. अधोलिखितस्य गद्यांशस्य हिन्द्याम् अनुवादं प्रसंगेन सह कुर्युः। 4

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्। महासैन्यं सः रचयामास। तया सेनया च मुगल शासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकान् भागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम्, इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन् काले 'चावण्ड' स्थानं स्थापत्य कलायाः ललितकलायाः वाणिज्यस्य विद्यायाश्च प्रमुखकेन्द्रम् आसीत्। प्रतापः महान् सेनानायकः जननायकः व्यवस्थापकः संघटनकर्त्ता च आसीत्।

2. द्वयोः पद्ययोः एकस्य सप्रसंगेन हिन्दी–अनुवादं कुर्युः। 4

यथा खनन् खनित्रेण, नरो वार्याधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।

अथवा

हिमालयात् समारभ्य यावदिन्दुसरोवरम्।
तं देवनिर्मित देशं हिन्दुस्थानं प्रचक्षते।।

3. अधोलिखितेषु श्लोकेषु एकस्य सप्रसंगेण संस्कृत–व्याख्या करणीया– 2

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।

अथवा

वन्दे नितरां भारतवसुधाम्।
विध्यहिमालय–गङ्गा–यमुना–सरयू–कृष्णाशोभितसरसाम्।।

4. वत्तस्य नाट्यांशस्य संप्रसगेण संस्कृतव्याख्या करणीया – 2

प्रतापः – अरे धिक् माम्। यदि अहं मातृभूमिं रक्षितुं न शक्नोमि, किमत्र वासेन मे प्रयोजनम्? (दीर्घ निःश्वसिति)

(ततः प्रविशति कश्चन राजपुत्र–सर्वदारः)

सर्वदारः – (राजोचितं प्रणम्य) विजयतां विजयतां महाराजः।

कृ.पृ.उ.



प्रतापः – (दीर्घ निःश्वस्य मुखम् उन्नमय्य च) हा धिक्। विजयध्वनिं कृत्वा त्वम् अपि किम् एवं मां लज्जयसे भ्रातः।

सर्वदारः – प्राणाधार! किम् इदं भवान् वदति? स्वधर्माय भवता सर्व किम् अपि कृतम्। स्वाधीनतायै सर्व किम् अपि सोढम्। भवतः सदा विजयः एव भविष्यति।

प्रताप :– कीदृशस्तावद विजयः? स्वदेशं परित्यक्तुं तु समुद्यतः अस्मि!

द्वितीय सर्वदार :– नहि नहि महाराज! यत्र–यत्र भवान् गमिष्यति, तत्र–तत्र वयम् अपि अनुगमिष्यामः।

प्रताप :– एवं न वाच्यम्। भवन्तः अत्र स्थित्वा मातृभूमेः सेवां कुर्वन्तु।

तृतीय सर्सदार :– नहि भगवन्। अस्माक् सेवा भवता सह सन्ति। वयं तु भवता सह एव निवत्स्यामः।

अथवा

गद्यांशस्य संस्कृतव्याख्या कुर्युः–

समाजसुधारकः केशवानन्दः मरूप्रदेशे व्याप्तानां मृत्युभोजनं, बालविवाहः, नार्युत्पीडनं, यौतुकप्रथा अवगुण्ठनप्रथा, अस्पृश्यता मद्यसेवनम् इत्यादीनां कुप्रथानां निवारणाय सदैव सचेष्टः आसीत्। स्वामिनो जीवनं सर्वपन्थसद्भावस्य निदर्शनमस्ति। अयं हि जाट–जातौ जातः परं सिक्खगुरोः नानकदेवस्य पुत्रेण श्रीचन्देन प्रवर्तिते उदासी सम्प्रदाये दीक्षितः। गुरुग्रन्थस्य उत्तमः पाठी अभूत्।

5. अधोलिखितेषु केषाञ्चिताना चतुर्प्रश्नाणां संस्कृते उत्तराणि देयानि। 4

(क) कपोताः कथं सिद्धिं प्राप्तवन्तः?
(ख) विद्यायाः प्रकार द्वयं किमस्ति?
(ग) सर्वदमनः कस्य वंशस्य आसीत्?
(घ) सूरजमल्लस्य औपचारिक–शिक्षा–विषये भवन्तः किं जानन्ति?
(ङ) गंगदत्तस्य परिभवः कैः कृतः?
(च) कदा दानं करणीयम्?
(छ) प्रतापस्य प्रतिज्ञा का?

6. रेखांकितपदान् आधारीकृत्य प्रश्न निर्माणं कुर्युः। 4

(क) भामाशाहः <u>विपुलं</u> धनं प्रतापाय ददाति।
(ख) <u>आत्महननं</u> महत्पापं वर्तते।
(ग) <u>खलस्य</u> विद्या विवादाय भवति।

(घ) सः कुप्रथानां निवारणे संलग्नः आसीत्।

7. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखेयुः यौ अस्मिन् प्रश्नपत्रे न स्तः। 4

8. अधोलिखितं गद्यांश पठित्वा प्रश्नानामुत्तराणि यथा निर्देशं लिखत। 8

इदं हि विज्ञान प्रधानं युगम्। "विशिष्टं ज्ञानं विज्ञानम्" इति कथ्यते। अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो परिदृश्यते। अधुना न हि तादृशं किमपि कार्य यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते। आवागमने, समाचारप्रेषणे, सम्भाषणे चिकित्सा क्षेत्रे, अन्तरिक्षक्षेत्रे, अन्नोत्पादने, वस्त्रनिर्माणे तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुङ्क्ते। तथाहि वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः, वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निघृणं च। अतः अस्य मानवकल्यार्थमेव मेव प्रयोगः करणीयः।

(क) अस्य गद्यांशस्य समुचित शीर्षक लिखत। 1

(ख) विज्ञानं किं भवति? 1

(ग) विज्ञानस्य प्रभाव केषु क्षेत्रेषु दृश्यते? 1

(घ) इदं हि विज्ञानप्रधानं युगम्। अत्र विशेषण–विशेष्यं किम्? 2

(ङ) "वैज्ञानिकैः उपयोगः विहितः" अत्र कर्तापदं कः शब्दः? 1

(च) निर्देशानुसारेण उत्तरेत – 2

1. "विज्ञानस्यैव", सन्धिविच्छेद कृत्वा संधेः नाम लिखत।
2. नापेक्ष्यते, संधिविच्छेद कृत्वा संधेः नाम लिखत।

9. अधोलिखित पदानां सन्धि सन्धि–विच्छेदं वा कुर्यात्। 2

(क) हरिम् + वन्दे (ख) सत्यैव (ग) प्रेजते (घ) नै + अकः

10. अधोलिखितानां समासं समास–विग्रहं वा कुर्यात् – 2

(क) गोदावरीतीरे (ख) जनानाम् अभावः

(ग) कार्यहन्ता (घ) त्यक्तलज्जः

11. रिक्तस्थानेषु उचितपदं लिखत। 2

(क) पाचकः ............. ओदनं पचति। (तण्डुल)

(ख) सीता ............. सह वनम् अगच्छत्। (राम)

(ग) ............. नमः। (गणेश)

(घ) पत्राणि ............. पतन्ति। (वृक्ष)



12. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृति प्रत्ययानुसारं रिक्त स्थानानि पूरयत। 2

(क) वृक्षम् ............. लता आरोहति। (अव+लम्ब्+ल्यप्)

(ख) जलं ............. सः तडागं गच्छति। (प्र+आप्+तुमन्)

13. मञ्जूषायां दत्तैः शब्दैः रिक्त स्थानानि पूरयत। 2

| इतस्ततः, कुत्र, विना, बहिः |
|---|

(क) जलात् ............. जीवनं असम्भवः।

(ख) जलं अन्वेषयन् सः ............. भ्रमति।

(ग) भवान् ............. गच्छन् अस्ति?

(घ) ग्रामात् ............. पिप्पलः अस्ति।

14. अधोलिखितानां वाक्यानां वाच्य परिवर्तनं कुर्युः। 2

(क) येन मरूः न दृश्यते। (कृर्तवाच्ये)

(ख) देवाः प्रसन्नाः भवन्ति। (कर्मवाच्ये)

15. 1. घटिका दृष्ट्वा समयः लेखनीयः। 2

(अ)



(ब)



2. रिक्त स्थाने समयः लिखत। 2

(क) रामः ............. विद्यालयं गच्छति। (11:45)

(ख) यज्ञांगी ............. अध्ययनं करोति। (02:30)

16. अशुद्धिसंशोधनं कुर्युः। 4

(क) त्रयः बालिकाः क्रीडन्ति।

(ख) सा मम भ्राता अस्ति।

(ग) पुत्र पित्रेण सह गच्छति।

(घ) माता पुत्रं विश्वासं करोति।

17. भवान् लोकेशः पाली नगरे आदर्श–छात्रावासे निवसति। स्वपितरं परीक्षा सम्यक् अभवत् इति सूचयम् पत्रं लिखत। 4

अथवा

आत्मनं कक्षा दशम्याः नरेन्द्रः मत्वा स्वप्रधानाचार्याय द्विदिवसस्य अवकाशार्थ प्रार्थना पत्रं लिखत।

18. मञ्जूषातः उपयुक्तपदानि गृहीत्वा पुत्रस्य अध्ययन विषये पिता पुत्र संवादः पुरयतु– 3

| अध्यापकः, समीचीनं, विषये, व्यवस्थां, काठिन्यम्, स्थानान्तरणम् |
|---|

पिता – रमेश! तव अध्ययनं कथं प्रचलति?

रमेशः– पितः! अध्ययनं तु .............. प्रचलति।

पिता – कस्मिन् अपि विषये त्वं .............. अनुभवसि किम्?

रमेशः– गणिते समस्या अस्ति। यतोहि मम विद्यालये इदानीं गणितस्य . .................................नास्ति।

पिता – त्वं पूर्व तु माम् अस्मिन् .............. न उक्तवान्।

रमेशः – पूर्व तु आचार्यः आसीत्। इदानी तस्य .............. अन्यत्र अभवत्।

पिता – अस्तु अहं तव कृते गृहे एव गणिताध्यापकस्य .............. करोमि।

पुत्र – धन्यवादाः।

19. निम्न वाक्यानां संस्कृते अनुवादः करोतु – 5

(क) कवियों में कालिदास श्रेष्ठ है।

(ख) तुम कहाँ जा रहे हो?

(ग) हम दूध पी रहे है।

(घ) शुचि गांव जाएगी।

(ङ) शैलीना पढ़ रही थी।

20. अधोलिखितान् वाक्यान् क्रमानुसारेण योजयित्वा पुनः लिखत। 3

(क) घटे जलम् अल्पम् आसीत्।

(ख) तस्य मस्तिष्के एकः विचारः आगत।

(ग) एकः पिपासितः काकः आसीत्।

(घ) सः पाषाण खण्डानि घटे अक्षिपत् जलं च ऊपरि आगतम्।



(ङ) जलं पित्वा सः काकः ततः अगच्छत्।

(च) सः वने एक घटं अपश्यत्।

21. चित्रं दृष्ट्वा षट्वाक्यानि लिखत। 3

पर्यावरणं, दूषितं, जलप्रदूषण, ध्वनिप्रदूषण, वायु प्रदूषणं, आवश्यकता, अस्माकं दायित्वं, पर्यावरण, संरक्षणेन, अस्माकं जीवन, सुरक्षितम्।



+++++